भाष्यमंजरीप्रारंभः॥श्रीरामचंद्रायनमः॥

श्रीगणेशायनमः॥ ॥नत्वाश्रीपतिपादपद्ममसलंविघ्नेश्वरंशारदांतद्वच्छ्रीगुरुपाद
पंकजयुगंध्यात्वाततःसादरं॥कालीस्तेनहिधुंडिराजकविनागीर्वाणवाक्यंजरीबा
लानांसुखबोधनायरचितासंशोधनीयाबुधैः॥ १ ॥केवलंवेदिकानांतुशब्दाब्धि
मतिदुस्तरं॥स्वल्पायासेनसंतर्तुंनिर्मितातरणीदृढा॥ २ ॥शब्दलिंगविभक्त्यादि क्रि
यंकर्मक्रियाव्ययं॥नानायदार्थसंज्ञार्थंमनयाबुध्यतेऽखिलं॥ ३॥प्रातरारभ्यविद्या
र्थाकर्तव्यंकर्मयद्भवेत्॥उक्तमासायपर्यंतमस्तितत्क्रमणेऽखिलं॥ ४॥उक्तिप्र रामः
युक्तिभिःकिंचित्स्त्रीपुंसाभ्यांविनोदतः॥गृहकृत्यविधौसर्ववक्ष्यमाणमुदीर्यते ३
॥ ५ ॥तदाह॥कश्चिद्ब्राह्मणःउषःकालेशयनादुत्थायप्रातस्तोत्रादिपठस्तन्॥

स्त्रियंप्रतिउक्तवान्॥अपिमयार्घार्घंकार्थेगम्यते॥क्षीघ्रंउदकंदेहि॥करपादविशे
धनार्थंमृत्तिकादेया॥इतिउक्तेसति॥तयाह्यहितिउत्थाय॥जलपूरितपात्रंदत्तं॥क
रपादविशोधनार्थंमृत्तिकादत्ता॥तदातेनशौचादिकंविधाय॥पीठोपरिस्थित्वा॥
करपादौप्रक्षाल्य॥दंतकाष्ठेनदंतान्विशोध्य॥पुनःस्त्रियंउवाच॥अयिस्त्रैणाखि॥म
यामणिकर्णिकास्नानार्थंगम्यते॥तर्णेस्नानसामग्रीदेहि॥अर्घ्योदकपात्रंदेहि॥अ
र्घ्यपात्रंदेहि॥रुद्राक्षमालिकांदेहिविभूतिवह्निकां॥देवतार्चनपेटिकां॥तिलनारि
केलंचददस्व॥एतानिवस्तूनिशीघ्रमानेहि॥पुनःस्त्रियोच्यते॥तराकिमर्थंक्रियते॥
अत्रदीपस्तूनास्ति॥अंधकारगृहेकिमपिनदृश्यते॥तर्हिचेत्कथंभविष्यसिइति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

उक्तेसति॥सःक्रोधेनाह॥रंडेकिंवदसि॥ममस्नानातिक्रमोजायते॥संध्यासमयोव
र्तते॥हेकांततूष्णींस्वरकिंक्रियते॥इत्युक्तेतयासर्वंदत्तं॥पुनस्त्रियमुवाच॥अ
द्यिअद्यमहत्सर्वंतिष्ठति॥अद्यकश्चिद्ब्राह्मणोनिमंत्रणीयः॥कश्चिद्यतीवाआक
रणीयः॥तवजामाताआयास्यति॥तवभ्रातापिआगछतु॥तवभ्रातुरपत्न्यान्याय
तु॥तवश्वशुरपत्न्यान्यपिआयांतु॥तवस्नुषायाःआकारणार्थंद्राक्दुहितरंसंप्रेष
य॥इतिउक्तेसतिपुनःसाह॥तर्हिभवतामपिभ्रातुरपत्न्यमाकारणीयंखलु॥आः त
स्यार्भकस्यकिं॥तंनिमित्तंकिंविशिष्टंकर्त्तव्यंभविष्यति॥सर्वेषांमध्येसोग्रेकःआ
यास्यति॥पुनःसाबभाषे॥बिंदुबिंदुनेवपुष्करिणीसूयते॥तस्यार्भकस्यगणना

BHAU DAJI LAD MUMBAI

कथंनभवतु॥तर्हिअद्यभक्षंकिंविधेयं॥यन्मनसिआयास्यतेतत्कुरु॥तर्हिउपसा
मग्रीमानेया॥तर्हिपुत्रमाकारय॥सतुनिद्रितोवर्त्तते॥रंडेयंग्रीघंउत्थापय॥सतुभ
वत्प्रेक्षएवतिष्ठति॥भवद्भिरेवबोधितव्यः॥पुनःसरोषेणाह॥अरेबलिवर्धनग्री
घसुषुप्तिस्थ॥प्रभासक्तजातः॥एतावत्कालपर्यंतंकिंनिद्रितोसि॥आलस्यंजहीहि॥
इत्युक्तेसतिसःतूर्णमुत्थितः॥करौमेलयित्वाविनयात्प्रणम्य॥पितुरग्रेस्थितवा
न्॥ततःपिताह॥अरेअद्यमहत्यज्ञोजनंतिष्ठति॥त्वंआपणेगछ॥उपसामग्रीआ
नेहि॥तर्हिमुद्रिकाढौकादेया॥पुनःपिताह॥अंतःपुरेगछ॥तत्रदारुमंजुषास्तिष्ठ
ति॥तन्मध्येजातरूपसंपुटोस्ति॥तदंतः॥सुवर्णमुद्रिकारजतमुद्रिकाबद्धस्तिष्ठति॥

तासकरजतमुद्रिकाद्वयंगृहाण॥ततःतत्सर्वंतादृगेवस्थापनीयं॥पश्चात्तन्मुद्रिकाद्वयंगृही
त्वाबृहद्दापणेगच्छ॥चतुस्तंभापणेगत्वामूषकमाधवजीहट्टेतेविभज्यदत्तबुकान्दृष्ट्वा॥यद्य
दपेक्षतेतत्तद्गृहाण॥भोपितःकिंकिंगृह्णामि॥तत्वदध्वं॥ततःपिताह॥अरेआदौघणि
जआपणेगत्वाघृतंसार्धंक्षीरद्वयंग्राह्यं॥तदर्धमुद्रिकाःभविष्यंति॥सिताशर्करायाह्या॥
पूरणार्थंचणकदालियाह्या॥हिंगुःग्राह्याः॥जीरकाःमरीचिकाःग्राह्याः॥हरिद्राचूर्णं
ग्राह्यं॥क्रमुकाःग्राह्याः॥एलालवंगाःजातीफलानिजातीपत्रंचग्राह्यं॥खदिरंमाक्षिक्म
र॥कर्पूरोग्राह्यः॥कस्तूरिकाग्राह्या॥केशरंगोरोचनंग्राह्यं॥उशीरोग्राह्याः॥तस्यापरना
मसुगंधवालाइत्यदीरयंतिजनाः॥दशांगग्राह्यं॥तत्रद्रव्यंगृहीत्वा॥तदग्रेगच्छ॥त
त्रपटशोधितागोधूमचूर्णंमतिज्ञयागृहीत्वा॥शुद्धमाषपिष्टंग्राह्य॥शुद्धचणक

दालिपिष्टंतंडुलपिष्टंचग्राह्यं॥ततोप्यग्रेशाकापणेगत्वापान्यान्शाकान्प्रामोषितान्
तान्गृहाणकान्कान्गृह्णामि॥तद्भूतध्वं॥अरेआदौश्रूरणोग्राह्यः॥शुभ्रकंदो
ग्राह्यः॥कर्कटिकाग्राह्याः॥बुद्बुरकाःग्राह्याः॥तर्हिकूष्मांडफलंग्राह्यं॥पीतकूष्मांड
चग्राह्यं॥परोवरणिष्टंताकानितुंबीफलानिगृह्णीष॥पटोलफलानि॥कोशांतकी
ग्राह्या॥कारवेलानि॥पनसफलानिगृहाण॥तदग्रेअन्नपूर्णांतिकेगत्वा॥तत्रअप
क्वकदलीफलानिपक्वकदलीफलानिगृहाण॥कदलीगर्भंकंदंकदलीकुसुमानि
चगृहीष॥तत्रनागवल्लीदलानिमागधीयानिपक्वानिगृहाण॥ततोपिद्रुतआग
त्य॥कालभैरवापणेगत्वा॥तत्रबर्हाःपत्रशाकाःवर्त्तंते॥तासुप्रथमतःमेथीपत्रं

गृहाण॥ तंडुलपत्राणिकूयोदकीपत्राणि॥ चक्रमर्दपत्राणि॥ बृहतीफलानिगृहाण॥
वनकारवेलानिमिलिष्यंतिचेत्तर्हीह॥ रक्तकंदपत्राणिश्वेतकंदपत्राणिमाप्स्यसेत
र्हिगृहाण॥ अरेतिंतिणीमाविस्मर॥ तथैवशृंगवेरंगृहाण॥ दीर्घरंभापत्राण्यानय॥
अतोप्यधिकंयद्यदृक्षसेतत्तत्तर्हाण॥ भोपितःएतेषांपदार्थानांस्मरणंकथंभविष्य
ति॥ तेनइतिउक्तंस्यति॥ पुनःक्रोधेनजनिताह॥ अरेमूर्खत्वंकेवलंगर्भमाप्तोसि॥ तवा
ष्टवर्षाणिकुतोगतानि॥ कोवेदहेमूदन्निरोमणे॥ तर्हिएकस्मिन्कागदेसर्वंसमा
लिख॥ तमालोक्यसर्वंगृहीत्व॥ इतिउक्तापुनर्जगाद॥ आःअद्यममभूरिविलंबोज्जातः॥
अतीवकालक्षेपोजातः॥ अहहःममादृष्टस्यसर्वेपिमूर्खतरामिलिताः॥ यथेयंदुर्भ ४

गारंडातथायंमंदधीःस्कतः॥ अनयोसंगदोषेणकुतःश्रेयोभवेन्ममभवतु॥ अतः
परंतुस्थातुंनशक्यते॥ इतिउदीर्यगंगातीरेणैवमणिकर्णिकांगतः॥ तत्रगत्वामहा
प्रयोगंउच्चार्य॥ यथाविधिस्नानंविधायसंध्यामनुष्ठितवान्॥ तदनंतरंब्रह्मयज्ञं
निवापश्राद्धिधाय॥ भगवंतंयथोक्तादिद्रव्यैःसंपूज्य॥ पुनरुत्थितः॥ तत्रैकमयाचि
त्तवृत्तिनंब्राह्मणंनिमंत्र्य॥ पुनर्घट्टंआरुह्य॥ सन्यासिनांमठेगतः॥ तत्रबहवोदंडि
नाश्छिताः॥ तेषुएकःदृष्टस्तंदिलोयतीस्छितः॥ तमालोक्यतदंतिकंगतः॥ दंडव
त्प्रणम्यवाक्यमुवाच॥ स्वामिनःश्रीमतांदर्शनेनअहमतीवकृतार्थोजातः॥ इतिः
उक्तेस्वामिभिःनारायणेत्युक्तंतदाभयंपुनरूचिवान्॥ स्वामिनःश्रीमतामत्रैवास्थि

तिर्वा॥पुनःस्वामिनःनारायणेस्मृते॥अतिसमीचीनोमठस्तिष्ठति॥अतिसम्यक्कुशलंवर्ततेति
ष्ठति॥स्वामिनाःकिंचिद्विज्ञप्तुकामोस्मि॥अंगीकृतंचेद्दृश्यामि॥किंभूत॥श्रीमद्भिःअद्यमद्गृहे
भिक्षार्थंआगतंचेत्कृतकृत्योभवामि॥स्वामिनःममाद्यजन्मनःसाफल्यंजातं॥ततःपरंयति
र्वर्यैरुच्यते॥अरेतवकावाजातिः॥स्वामिनोअहंमहाराष्ट्रोस्मि॥एवंकिल॥तर्हिमहाराष्ट्रामां॥
गृहेअस्माकीनांभिक्षातुअतीवश्रस्ताः॥ततःपरंत्वंश्रोत्रियोसिकिं॥स्वामिनःश्रोत्रियोस्मि॥
तर्हिसम्यक्ज्ञातं॥कुतःयाचयेच्छ्रोत्रियस्यान्नंतदभावेजलंपिबेत्॥तदद्यतद्घटितं॥अ
रेपरंतुत्वंगौडब्रह्मससे॥किमिदं॥सत्यंस्वामिनः॥ममजन्मगौडदेशेवजातं॥ममपितुरपि ५
जन्मतत्रैवजातं॥आवाभ्यांतत्रैवाधीतं॥एवंवा॥तर्हितवपितुर्नामधेयंकिं॥स्वामिन

ममपितुर्नामअच्युतप्रमतिर्वसिष्ठभट्टाचार्यइतिप्रसिद्धं॥तवनाम॥ममनामस्वामिन॥
ज्ञालमिचिह्नांकारश्रीलंकारअलर्षियुध्मस्वज्ञकृत्पुरंदरभट्टाचार्यइतिउदीरयंतिजनाः॥
सत्यं॥तत्रत्यानामेतादृग्मिवरीर्घतरंनामभवति॥त्वमपितत्रत्यःकिल॥॥स्वामिनःइत्यु
क्त्वा॥पुनरूचिवान्॥स्वामिनःतर्हिउत्थानंकर्त्तव्यं॥समयस्तुजातः॥अतःपरंदंडकमंडलु
दिकंगृहीत्वासमयासहैवश्रीमद्भिरागंतव्यं॥इतिउक्तेसति॥स्वामिभिरुच्यते॥अरेतवगृ
हंकियत्दूरंतिष्ठति॥कस्मिन्घट्टेस्ति॥स्वामिनःसमीपंतिष्ठति॥दुग्धविनायकसमीपेवर्त
ते॥गंगादासइतिप्रसिद्धमहाजनस्तस्यायतनसमीपेममापिवेश्मतिष्ठति॥तर्हिभवतु॥
इत्युक्त्वा॥स्वामिनःउत्थिताः॥दंडकमंडलादिकंगृहीतं॥तदास्वामिनःशिष्यंप्रत्यूचुः॥

भा.मं. अरेमेषाश्मखयाअत्रैवस्थातव्यं॥मठंस्वाकुत्रापिनगंतव्यं॥तर्हिस्वामिनःभिक्षा
६ र्थंकुत्रचिद्गंतव्यंखलु॥अरेकिंवदसि॥अद्यकुत्रापिमागछ॥तत्रएधुकास्तिष्ठंति॥त
त्रंवर्त्ततेतदेवभक्षणीयंकुतःश्राम्यसिइतिउक्ता॥स्वामिभिःप्रयातं॥तदायजमानाह॥
स्वामिनःभवंतः॥अग्रेभवंतुअहंपश्चाद्व्रजामि॥इत्याकर्ण्ययतिरुच्यतेनहिनहि
त्वमग्रतोभव॥अहंपश्चाद्व्रजामि॥अतीवसंमर्दःस्तिष्ठति॥त्वयासर्वेषांनिराकरणंक
र्त्तव्यंनोचेत्स्पर्शोभविष्यति॥इतिउक्तेसतितेनांगीकृतं॥तथैवकृतवान्॥पुनस्तावु
भौगृहमागतौ॥अंतर्गृहमागत्यपुत्रमाकारयामास॥अरेभास्करशीघ्रमेहि॥ ६
स्वामिनांपादप्रक्षालनार्थंउदकंदेहि॥इत्युक्तेसति॥तेनशीघ्रमुदकमानीतं॥तदा

यजमानःस्वहस्तेनस्वामिपादौप्रक्षाल्य॥तद्भसान्निरस्याभुक्त्य॥अंतःपुरेगतः॥ततःस्वा
मिनःब्रह्मपीठोपरिसावकाशंतरस्थौ॥तदायेभोजनार्थंआगतास्छितास्तैःसर्वैःस्नात्वा॥
अंतरागतंततःयजमानःभगवतःषोडशोपचारपूजनंकृत्वानैवेद्यंनिवेद्य॥वैश्वदेवंब
लिहरणंचचारतत्तःअंतःपुरेगत्वास्वामिनामधोदत्तोसर्वान्यथास्थानंसंनिवे
श्य॥अमत्राणिददौ॥तेषांमध्येयतीनांतुपुत्रंअतीवविपुलंसाग्रंदत्तवान्॥द्रोणसम
कंददौ॥अन्येषांदीर्घरंभापत्राणिपत्रपुटद्वयंअदापयत्॥ततःयतिवर्यान्पंचोपचा
रैःसंपूज्य॥अन्यान्गंधाक्षतादिभिरलंकृत्य॥सर्वेषांचरणतीर्थंअग्रहात्॥ततः
स्त्रियंप्रसुवाच॥अयिआदौघृतेनसर्वेषांपात्राणिअभिघार्यशीघ्रंपरिवेषय॥इ

तिउक्तेसतिसा॥ द्राक्उत्थायपरिवेषयामास॥आदौलवणंपरिवेषयित्वा॥पश्चाल्लव
णशाकान्परिवेक्ष्णिषे॥निंबूफलानामुपदंशः॥शृंगवेरोपदंशः॥सूरणस्योपदंशः॥
धात्रीफलानामुपदंशः॥कपित्थस्योपदंशः॥बदरीफलस्योपदंशः॥कारवेल्लस्यलव
णशाकः॥बृहतीफलानांभृष्टालाबुः॥शालफलानांलवणशाकः॥कीचकांकुराणामु
पदंशः॥वृंताकस्योपदंशः॥उर्वारुकस्योपदंशः॥अलाबुभृष्टालाबुः॥कदलीकुस्तुमा
नांभृष्टालाबुः॥कदलीगर्भभृष्टालाबुः॥मूलकस्योपदंशः॥गंजराणांलवणशाकः॥त ७
तःपरंनानाविधशाकान्परिवेक्ष्णिषे॥ततःशुष्कमाषवटकान्परिवेक्ष्णिषे॥मिर्चवटि
काःकूष्मांडवटिकाः॥अंगुष्ठवटिकाः॥कूष्मांडबीजवटिकाःतिलवटिकाःपरिवेक्ष्णि

षवतीं॥ततःपर्पटकान्परिवेक्ष्णिषे॥दधिवटिकाःपरिवेक्ष्णिषे॥द्राक्षवटिकाःपरिवेक्ष्णि
षे॥शुष्कचणकदालिनिर्मितदधिसर्षपोपस्कृतभृष्टालाबुवटिकाःपरिवेक्ष्णिषे॥मेथी
कूटंपरिवेक्ष्णिषे॥ततःपरंसूक्ष्मशालितंडुलानामोदनंसर्वेषांमध्येपरिवेक्ष्णिषे॥त
तुपरिशुष्कआढकीसूपंपरिवेक्ष्णिषे॥ततःनानाविधानिभक्षाणिपरिवेक्ष्णिषे॥तेषा
विक्षेषमाह॥आदौपूरणगर्भाःपरिवेक्ष्णिषे॥ततःमंडकान्परिवेक्ष्णिषे॥लड्डुकान्प
रिवेक्ष्णिषे॥अतिस्नान्॥अपामार्गान्परिवेक्ष्णिषे॥शष्कुली०दधिवटिकाःपरिवेक्ष्णि
षे॥घृतपाचितशुष्कमाषवटकान्परिवेक्ष्णिषे॥पूरिकाव्॥वटपूरिकाःपरिकाःपरि
वेक्ष्णिषे॥फेणिकाः॥चिरवटिकान्परिवे०॥घृतपूपान्परिवे०॥जिह्वालेह्यान्॥पर्प

दिकाः परिवे०॥ शर्करोपस्कृतपूरिकाः परिवे०॥ मोदकान्परिवे०॥ तिललड्डुकान्परि०॥
मुद्गलड्डुकान्०॥ घृतभर्जितगोधूमचूर्णलड्डुकान्परि०॥ निष्पावलड्डुकान्परिवेष्टि०॥
पष्टिकौदनपरिवेष्टि०॥ अतऊर्ध्वंनानाविधानिभक्ष्याणिपरिवेष्टिशेषे॥ ततः पायसान्नानि
परिवेष्टिशेषवती॥ गोधूमविकारजानिसप्तविधानिपायसान्नानिपरिवेष्टि०॥ केवलं
डुलपाचितपायसान्नंप्रियंगुपायसान्नंचपरिवेष्टिशेषे॥ तदुपरिशुक्लसितांशर्करांच
रिवेषयामास॥ ततः गोघृतेनैवसर्वेषांद्रोणाः पूरिताः॥ तदनंतरंव्यंजनोपस्कृतवा
पीपरिवेष्टिशेषे॥ तन्निकटेमरीचचूर्णेपरिवेष्टिशेषे॥ स्वामिनांद्रोणसप्तकेकिंकिंपरि
विष्टंतदाह॥ दधिदुग्धघृतक्वाथितक्रपूरणसारके॥ षट्द्रोणाः पूरितास्तूर्णंयतोद्रोणा

यथादत्तं॥ एकः जलपानार्थंस्थापितः॥ ततोयजमानः ब्रह्मार्पणेनान्नंसंकल्पितवान्॥
ततः द्राक्स्वामिनाहस्तोदकंदत्तं॥ ततः सर्वैः आपोशनंगृहीतं॥ ततोयजमानोपितेषांपंक्तौ
स्वयंस्थितवान्॥ तदा॥ स्वामिनः बहून्यदार्थान्निरीक्ष्यपरंव्याकुलतयाबुभुजुः॥ तत
यजमानः श्रीपादान्प्रार्थयामास॥ स्वामिनः अद्यपरमअतिकालोजातः॥ सावकाशंत
याभोक्तव्यं॥ यद्रोचेतत्कार्यं॥ यन्नरोचेततत्याज्यं॥ एवमेवसर्वेषांप्रार्थनांचकार॥त
तः सर्वैर्यथारुचिभुक्तं॥ स्वामिनंपुरस्कृत्यउत्थितं॥ ततः स्वामिनोहस्तप्रक्षालनो
र्थंउदकमदापयत्॥ करशोधनार्थंशर्करादत्ता॥ दंतशोधनार्थंवेणुशलाकामदाप
यत्॥ करोद्वर्तनार्थंचंदनंदत्तं॥ ततः स्वामिनः स्वस्थतयाहस्तपादप्रक्षालनंकृत्वा॥

अगस्त्यादीनास्मरणंचक्रुः॥ततोयजमानःयतिवर्यान्पुरस्कृत्य॥अन्यान्सर्वानादा
यसौधांतरेगतवान्॥तत्रबृहत्पीठोपरिस्वामिनःसावकाशंतस्थुः॥अन्येविचित्रास्त
रणोपरिस्थिताः॥तदायजमानेनस्वामिनांमुखशुध्यर्थंमुष्टिपरिमितलवंगादत्ता॥
अन्येषांतांबूलदक्षिणादिकंदत्वाविसर्जयामास॥ततस्तेसर्वेयजमानायआशिषं
प्रयुज्यस्वेस्वनिकेतनंजग्मुः॥ततःयजमानःश्रीपादानांनमस्कारार्थंस्त्रीपुत्रा
दीनाकारयामास॥तदायजमानस्यपत्नीभर्तुःवाक्यंश्रुत्वासर्वकार्यंपरिस्रुषा
दुहितरोचसमादाय॥तत्रतूर्णंसमागता॥तत्रागत्यविनयात्प्रणनाम॥तदास्वा ९
मिभिःसादरंदृष्ट्वानारायणनारायणेत्युक्तं॥पश्चात्साअंतःपुरंगता॥ततःस्वामि

नःऊचुः॥अरेदृश्यंतवग्रहणीकिं॥स्वामिनः॥परंसाध्वीभवति॥यत्रआकृतिस्तत्र
गुणावसंति॥इतिश्रुतं॥तदद्यदृष्टं॥त्वंपरंभाग्यवान्असि॥कुतः॥भोज्यंभोजन
शक्तिश्चरतिशक्तिर्वरस्त्रियः॥विभवोदानशक्तिश्चनाल्पस्यतपसःफलं॥१॥
इतिउक्तंवर्त्ततेतेसर्वेगुणास्त्वयिदृष्टाः॥त्वत्तोन्यःकश्चिद्भाग्यवान्॥स्वामिनःभ
वनंप्रसादात्वत्तु॥अरेतवकृतिअपत्यानितिष्ठंति॥स्वामिनः॥द्वेपुत्रौस्तः॥द्वेदुहित
रौवर्त्ततेतेइमेद्वावपितवकुमारौवा॥एतयोर्नामकिं॥स्वामिनः॥ज्येष्ठस्यदिवाकर
इतिनाम॥अपरस्यप्रभाकरइत्यभिधानं॥एताभ्यांकिंचित्पठ्यते॥स्वामिनःकिंनि
ह्याकरणेपठ्यते॥काव्यानिपठ्यंते॥कोशादिकंअधीतंवर्त्तते॥एवंवा॥तर्हिसम्यक्॥

भा.मं. एनयोर्विवाहोजातोस्तिवा॥स्वामिनः॥ज्येष्ठस्यलग्नंजातं॥कनिष्ठस्यन॥एवंतर्हि
९० तवस्नुषानदृश्यते॥अधुनाप्रणामार्थंआगतास्तिष्ठतिखलु॥सैववा॥तर्हि अतिशोभ
नावर्त्तते॥परमलावण्यवतीवर्त्तते॥तवपुत्रस्ययोग्याभवतिस्वामिनः॥एतस्याः प्र
थमरजोत्सवोजातोवर्त्ततेवा॥जातःस्वामिनः॥कतिदिनानिजातानि॥स्वामिमास
द्वयंजातं॥एवंतर्हिसम्यक्॥परंतुसर्वेषांआज्ञयावर्त्ततेखलु॥एतावत्सर्यंतंतिष्ठति॥
अरेत्वंभाग्यवान्असि॥स्वामिनःसर्वेभवतांकृपया॥अपराधोऽस्मावार्षिकीदृष्टा
साका॥स्वामिनःममज्येष्ठदुहिता॥अरेएतस्याःपरिणेतासएववा॥आः दुष्टंकिंकृतं॥ ९०
सःकनीयान्दृश्यतेरुग्णोविवर्त्तते॥अनयायोग्यानभवति॥एवएतादृशीलावण्य

वतीकन्यासरोऽयंईदृक्दुर्भगादृशंअनुचितंकृतं॥स्वामिन्॥तस्याःब्रह्मसूत्रेणाकृ
तं॥मयाकिंकर्त्तव्यं॥परंतुवयसाअधिकास्तिष्ठति॥परंतुहस्तोवर्त्ततेभवतु॥अपर
स्याःविवाहोजातोन नहि॥स्वामिनःतर्हितस्याःएवंनकर्त्तव्यंहोदृष्टव्ये॥स्वामिन
तस्याःभारध्यगस्यापद्भविष्यतितद्भवतु॥अरेतवकनिष्ठकुमारस्यलग्नंकदाभ
विष्यति॥स्वामिनःमासचतुष्टयादूर्ध्वंभविष्यति॥तर्हि॥कुत्रचिद्योजितंवर्त्ततेखलु॥
होस्वामिनः॥कुत्रा॥स्वामिनःब्रह्मघट्टेभास्करभट्टनामाब्राह्मणास्तिष्ठति॥तस्य
दुहित्रासाकंघटितोर्थस्वायाति॥तेनदास्यामीस्फुटंवर्त्ततेखलु॥परंतुऋणानुबंधो
बलवत्तरः॥अपरंच॥भ्रमन्वनांतेवनमंजरीषुनषट्पदोगंधपरैवजिघ्रत्॥सांप्रं

तरम्यासचकिंनरंतावलीयसीकेवलमीश्वरीछा॥ १ ॥एवंवा॥तर्हि॥अहंतंजानामि॥त
स्यगृहेमयाभिक्षार्थंवस्तुवारंगतंवर्त्तते॥तस्यभार्याअतीवसाध्वीवर्त्तते॥अतिशोभ
नावर्त्तते॥तयामचिभूरिस्नेहोविधीयते॥तस्याःपाकस्तुअतिरुचिरोभवति॥परंतुकु
त्सावर्त्तते॥तर्हिसातवयोग्याभवति॥स्वामिनःउपहस्यतेकिं॥नहि॥रे॥तवसंबंध
योग्यैभवति॥कुलीनावर्त्तते॥तांअहंजानामिइतिकथाउच्यंते॥हृष्ट्वंस्वामिनःय
दाभविष्यतितदाखलु॥नहिनहि॥खंसकृतीअसि॥ईश्वरस्यकृपयातववांछितं
शीघ्रंभविष्यति॥तथास्तु॥पुनःस्वामिनःऊचुः॥अरेपरंतुमयातवभार्ययासमा ९१
कापियोषिंनदृष्टा॥एतस्याःगुणान्किंकिंवर्णयामि॥कुतः॥मुखूर्नेहूयाभ्यांतरंम

याएतादृग्गाःसमीचीनपाकोपिविहितः॥एतेपदार्थाःरचिताः॥पुनःसर्वान्परिविष्य
ब्राह्मणान्यथेछंभोजयित्वा॥इदानीं॥स्वयमपिभुक्तवतयाआकारितेसतिआत्मा
पिआगता॥एतावान्उद्योगःअन्यासांस्त्रीणांआयास्यतिवा॥एतेगुणाःअभ्यास
सिद्धाःनभवंति॥कुतः॥दारुत्वंपियवक्रुत्वंधीरत्वमुचितज्ञता॥अभ्यासेननलभ्यंते
चत्वारःसहजागुणाः॥ १ ॥एतेसर्वेगुणाःतवयोषितवर्त्तंते॥त्वयाअतिभाग्यवता
तद्यंलब्धातवपरंसुखदात्रीभवतु॥अरेश्रृणु॥तवयोषित्सगर्भाअस्तिकिं॥सत्यंस्वा
मिनः॥मासचतुष्टयंजातंवर्त्तते॥एवंवा॥तर्हिमयाआदावेवज्ञातं॥सत्यंतर्हिसम्य
क्जातं॥अष्टपुत्राभवतु॥तथास्तु॥स्वामिनःपुनःऊचुः॥अरेतवपितावाराणसीस्थ

गोदेशेबहुवर्षपर्यंतंकिमर्थंस्थितः॥स्वामिनःविद्याभ्यासार्थंस्थितः॥तर्हिकाश्यांअध्या
यनंनभवतीकिं॥नभवतिकुतःभवतिपरंतुतत्रतर्कंअधीतं॥स्वामिनःयथापिटचर
णेाअभ्यासस्कृतः॥तावत्मयाकर्तुंनशक्तं॥तदर्थंकिंचिन्मयाअभ्यस्तं॥किंकिंअभ्य
स्तंत्वया॥स्वामिनः॥मयाआदौपंचप्रकरणान्यधीतानि॥ततःचिंतामणिरधीतः॥
पश्चाच्छिरोमणिरभ्यस्तः॥तदनुमथुरानाथीअधीता॥ततःभाव[illegible]पठि[illegible]॥
ततःमिश्रांतापियंथादृष्टाः॥अन्यत्किंअधीतं॥अष्टादशापिकोशाःहस्ताःवंर्त[illegible]॥
भाष्यंतंव्याकरणंअधीतं॥मीमांसायामपिअध्ययनंवर्त्तते॥वेदांतेपिपरिश्रमोस्ति॥ ९२
अष्टादशपुराणानिकथितानिवर्त्तते॥छंदोलंकारनाटकसाहित्यसहितानिकाव्या

न्यपिपठितानिवर्त्तते॥ज्योतिषेपिअभ्यासोस्ति॥वैद्यकेपिपरिश्रमोस्तिविहितः॥संगी
तेपिपरिश्रमोवर्त्तते॥अतोप्यधिकंयत्किंचिद्वर्त्तते॥तत्रसर्वत्रममअभिनिवेशोव
र्त्तते॥स्वामिनःऊचुः॥त्वयाऽसर्वंअधीतं॥वेदानाधीतःकिंतुत्रिवारंवस्वामिन
वेदंविनाब्राह्मणत्वंकुत्र॥ब्राह्मणानामादौवेदाध्ययनंपश्चात्किमपिभवतु॥तर्हि
कान्वेदान्अधीतवान्असि॥ऋग्वेदोथयजुर्वेदःसामवेदोथर्वणः॥चत्वा
रोवेदाअधीताःषडंगपदक्रमाः॥एवंवातर्हिसम्यक्नहिमयाश्रूयतेवंगदेशीयाः॥
द्विजोःकेवलंवेदबाह्याःभवंति॥सत्यंस्वामिनः॥तत्रत्याःब्राह्मणाःस्मृतिप्रामाण्य
नवर्त्तते॥नतुवेदाध्ययनंकुर्वंति॥एवंवाभवतु॥अन्यत्किंचिन्मयाश्रुतंवर्त्तते॥तत्रत्याः

ब्राह्मणाःमत्स्यान्नंकुर्वंति॥तर्हिअयंतुभूयान्दुराचारःक्रियतेतैः॥इदंसत्यंवाअ
लीकं॥तत्रुसत्यंस्वामिनः॥एतादृग्दुराचाराःकुत्रनास्ति॥सर्वत्रएकैकःदुराचारस्ति
ष्ठति॥एतादृशाःकुत्रचिद्दुराचाराःस्तिष्ठंतिकिं॥अहंदर्शयामिस्वामिनः॥भवद्भिः
द्रष्टव्यं॥आदौदक्षिणदेशेकलौमातुलकन्यावरणंद्रमेवदुराचारः॥श्रीमतांकर्ना
टकदेशेस्नानंविनाभोजनंदुराचारः॥ताम्रपात्रेगव्यादिनिक्षेपणंदुराचारः॥द्रवि
डकेरलयोःसर्वासांकुचदर्शनंदुराचारः॥पथिपर्युषितान्नभक्षणंदुराचारः॥केर
लदेशेउपरिस्फुरतंदुराचारः॥कोंकणदेशेक्षुरोहणंदुराचारः॥गुर्जरदेशेचर्मो ९३
दकपानंदुराचारः॥तृतीयदिनेरजस्वलास्नानंदुराचारः॥उत्तरदेशेकलौमांसभक्ष

णंदुराचारः॥क्वचिच्छुष्कमांसभक्षणंदुराचारः॥गौडदेशेवेदत्यागोपिदुराचारः॥का
न्यकुब्जदेशेपक्वान्नघृतपक्वभक्षणंदुराचारः॥विवाहादौभोजनसमयेपरस्परस्प
र्शनंदुराचारः॥उत्कलदेशेमुखस्फुरतंदुराचारः॥पर्वतदेशेकलौदेवरेणसुतोत्प
त्तिःदुराचारः॥मैथिलगौडदेशेसदातैललेपनंदुराचारः॥गौडद्रविडकेरलोत्कलमै
थिलेषुपक्वकलमतंडुलभक्षणंदुराचारः॥मगधदेशेवर्णसंकरोदुराचारः॥वंद्या
वस्यादासीगमनंदुराचारः॥काश्मीरदेशेयाह्निजाःकेवलंयवनंभार्याःखलुतेषांदु
राचाराणांगणनानैवनास्ति॥सर्वेषांस्ववृत्तिंपरित्यज्यअन्यदेशेसेवलंबनं॥क
न्यादिविक्रयाणांविक्रयकरणंपर्युषितंतांबूलभक्षणंइत्यादि॥दुराचारविशेषः॥स्व

भावतएवभवति॥स्वामिनः॥महाराष्ट्रंविनासर्वीसज्ञातिषुकश्चित्कश्चिदुरा चारास्ति
ष्ठत्येव॥महाराष्ट्रेषपियेमध्यावर्त्ततेतेषांदुरा चारस्यलवलेशोपिनदृश्यते॥इदंतुव
यासत्यंउक्तं॥मयापिअनुभूतंवर्त्तते॥स्वामिनःनोचेत्अन्यतमुच्यतेकिं॥श्रीमत
कृपयावयंसर्वेजानीमः॥सत्यं॥रेतवगोदेशेकानिकानितीर्थानिवर्त्तते॥स्वामिनःगं
गासागरतीर्थेवर्त्तते॥कुमारिकातीर्थेवर्त्तते॥कुमारिकादेवीवर्त्तते॥ब्रह्मपुत्रस्तिष्ठ
ति॥कामरूपेश्वरस्तिष्ठति॥कामाक्षीदेवीवर्त्तते॥ततोप्यधिकानिबहूनितीर्थानि
बहून्यायतनानिवर्त्तते॥एवंवा॥अन्यत्किंचित्विशिष्टंवस्तुजायते॥पट्टवस्त्रा
णिबहुमौल्यानितत्रभवंति॥क्षीरोदकसंज्ञानिदुकूलानिचातिसमीचीनाजायंते॥

DR BHAU DA

अन्यान्यपिरेशमसंभवानिसमीचीनानिबहुविचित्राणिभवंति॥स्वामिनः॥रेशमोत्पत्तिः
एथिव्यांस्तत्रैवजायते॥अन्यानितूलजानिवस्त्राणिअतिसूक्ष्माणिभवंती॥तथा
सर्वाणिधान्यानितत्रभवंती॥व्रीहयोभवंति॥गोधूमाःभवंति॥यवाःभवंति॥चणकाः
भवंति॥आढक्योहिजातीनिभवंति॥माषाःहिजातीयाःभवंति॥मुद्गाः॥मसूराः॥रा
जमाषाः॥कुलिस्थाः॥लंकाः॥तिलाःहिजातीयाः॥रवल्वाःभवंति॥प्रियंगवाः॥एण
वः॥नीवाराः॥श्यामाकाः॥मंडवः॥सर्षपाः॥त्रिविधाभवंति॥एथुकाःअतिसमीचीनो
जायते॥सःकथंएथुकाः॥किरतसूरुहपीतस्तरुणीकरकमलैरुपनीतः॥पयसाःसु
कैरयासमुपेतःकर्षतिकस्यजनस्यनचेतः॥एतादृशश्चिपटकस्तत्रैवभवति॥शर्करा

अतिशोभनाजायते॥सिताऽपिभवति॥गुडोभवति॥दुग्धंसमीचीनंजायते॥दधिभवति॥क्षौद्रोभव
ति॥घृतंअतिसमीचीनंवर्त्तते॥तैलानिबहुविधानिभवंति॥तिलतैलं॥सर्षपतैलं॥अतसी
तैलं॥एरंडतैलं॥कुसुंभतैलंजायते॥नानाविधानिसुगंधतैलानि भवंति॥नानाविधानिसु
गंधअर्काणिभवंति॥बहुविधाः वाराखाः भवंति॥ बहुविधाःवृक्षाः संति॥आम्रवृक्षाः॥पन
सवृक्षाः वर्त्तंते॥नारीकेरतरवः॥ क्रमुकाः॥बहुधाःकदलीतरवश्चसंति॥ बदरीवृक्षाः॥
जंबूफलतरवः॥दाडिमीवृक्षाः॥कदंबवृक्षाः॥बकुभूरुहाः॥पारिजाततरवः॥चंपकवृक्षाः
त्रिविधाःसंति॥बहुविधाःनिंबूतरवःसंति॥पिचुमंदवृक्षाःसंति॥नागरंगगुल्माःवर्त्तंते॥ १५
सीताफलवारिणः॥कपित्थवृक्षाः॥केतकीगुल्माःसंति॥वामीवृक्षाः॥धात्रीवृक्षाः॥तिं

तिणीवृक्षाः॥कर्वंदगुल्माः वर्त्तंते॥भूपलाशगुल्माःतिष्ठंति॥देवदारूतरवःसंति॥चंदनवृ
क्षाः॥रक्तचंदनतरवः॥शुक्लागरुतरवः॥कृष्णागरुतरवः॥न्यग्रोधवृक्षाःसंति॥अश्वत्थवृ
क्षाः॥औदुंबरवृक्षाःवर्त्तंते॥शाल्मलीतरवः॥कंचनवृक्षाःसंति॥बिल्ववृक्षाःसंति॥मधु
वृक्षाः॥अशोकवृक्षाः॥कर्मेतरवःसंतिः॥तमालतरवः॥तालवृक्षाः॥नालवृक्षाः॥माल
फलवृक्षाः॥सरलतरवः॥पुंगवृक्षाः॥अर्जुनवृक्षाःसंति॥बदरीवृक्षाद्विप्रधाः॥केदूकवृ
क्षाःविद्यंते॥धव॥खदिर॥वर्बुरवृक्षाः॥पलाशतरवः॥बिभीतकवृक्षाः॥भल्लातकवृक्षाः॥
भूर्जतरवः॥अभयावृक्षाःसंति॥कीचकाःविद्यंते॥वेतसाःसंति॥करंजवृक्षाः॥गुग्गु
लवृक्षाः॥वलंजुवृक्षसप्तछदाःसंति॥चारवृक्षाः॥अगस्तिवृक्षाः॥पूगतरवः॥बचना

गतरवः॥वनस्पतयोबहुधाः संति॥अपामार्गगुल्माः॥नागकेसरंजायते॥भृंगराजस्तृणं॥बृ
हतीगुल्माःभवंति॥अर्कधत्तूरगुल्माद्विविधानिभवंति॥मुचुकुंद॥तुलसीबर्बरी॥ब्राह्मी
सैंदी॥दूर्वाद्विविधानिभवंति॥अपराजितास्ति॥पुनर्नवावर्त्तते॥विजयागुल्माः॥रुदंती॥
वाचस्पतिविद्यते॥अथलतावितानोषाः॥माधवीलता॥मालती॥आकाशवल्ली॥मरीचलताः॥
पिप्पलीलताः॥गुडूचीनागदमलता॥मुंजालता॥नागवल्ली॥सेवंतिकागुल्माः॥वासंति
का॥कुंदपुष्पाणि॥करवीरपुष्पाणि॥असनकुसुमानि॥पाटलीकुसुमानि॥मंदारपु
ष्पाणि॥जातीकुसुमानि॥मल्लिकापुष्पाणि॥मल्लिकासुमनानिविद्यंते॥बंधूकपुष्पा १६
णि॥सिंदूरकुसुमानि॥मालीकुसुमानि॥तुलसीगुल्माःभवंति॥दमनगुल्माःमरुगुल्माः

भवंति॥दूर्वाभवंति॥अपस्मारेक्षुवोभवंति॥कुशाःविद्यंते॥काशाःविद्यंते॥शराःवि
द्यंते॥श्वेतदूर्वाविद्यंते॥विष्णुक्रांतास्तृणमस्ति॥अतोप्यधिकाःवनस्पतिविशेषाःव
हवस्तिष्ठंति॥नद्योबह्व्यस्तिष्ठंति॥पूर्वसमुद्रोस्ति॥भागीरथीवर्त्तते॥अन्यानिबहुविधा
निसरांसिविद्यंते॥पुष्करिण्यःसंति॥तासुबहुधानिसरोवराणिभवंति॥नूतपत्राणि
संति॥इंदीवराणिभवंति॥कुमुदानिबहुविधानिजायंते॥तत्रबहुधाःपक्षिजातयः
संति॥निरपतत्रिणःसंति॥हंसाःविद्यंते॥कंकाःविद्यंते॥वायसाःविद्यंते॥पिकाःवि
द्यंते॥मयूराःसंति॥चातकाःसंति॥चक्रवाकाःसंति॥खंजनाःसंति॥शुकाःविद्यं
ते॥सारिकाःविद्यंते॥चकोराःसंति॥जलकुक्कुटानिविद्यंति॥कोयष्टयःसंति॥दा

त्यूहाः संति॥ कारंडपक्षिणः संति॥ गृध्राः संति॥ चाषाः संति॥ पिंगलाः॥ हरिताः॥ भृंगरा
जाः॥ पारावताः॥ सारसाः॥ उलूकाः॥ वायुरिण्यः॥ टिंडिभाः संति॥ तथाबहुविधानिन्या
पदानिविद्यंते॥ व्याघ्राः संति॥ वनमहिषाः॥ ऋक्षाः॥ जंबूकाः॥ गोमायवः॥ खड्गमृगा
वर्त्तंते॥ मृगाः संति॥ चमरयवः संति॥ भल्लूकाः संति॥ मर्कटाः संति॥ श्वानः संति॥ मृ
गियाः संति॥ तथाग्राम्यपशवः॥ गावः संति॥ महिष्यः संति॥ अजाः संति॥ एडकाः सं
ति॥ मेषाः संति॥ उष्ट्राः संति॥ गजाः संति॥ अश्वाः संति॥ खेचराश्चिसंति॥ रासभाः
संति॥ मार्जाराः संति॥ मूषकाः संति॥ नकुलाः संति॥ सर्पाः विद्यंते॥ मेकाः संति॥ ९७
उछुंदर्यस्तिष्ठति॥ शारदाः संति॥ पल्यः संति॥ वृश्चिकाः विद्यंते॥ मक्षिकाः संति॥

मशकाः संति॥ मकुणाविद्यंते॥ क्षुद्राः संति॥ पतंगाः संति॥ भ्रमराः संति॥ पिपीलिकाः
संति॥ अतोप्यन्येबहुधाः जंतवः तिष्ठंति॥ अथजलजंतवः बहुविधाः॥ मत्स्याः संति॥
सर्पणः संति॥ कूर्माः विद्यंते॥ नक्राः विद्यंते॥ जलेसर्पाः संति॥ जलराक्षिकाः संति॥
जलकर्कटाः विद्यंते॥ जलूकाः संति॥ जलमूषकाः संति॥ जलमनुष्याः संति॥ एभ्योब
हुजलंजंतवस्तिष्ठंति॥ नौविद्रोषाबहवः संति॥ नौचारिणः बहुकुशलाः विद्यंते॥ कै
वर्त्तकाः बहवः संति॥ नौव्यवसायिनः बहवो वर्त्तंते॥ बहुविधाः जनाः वर्त्तंते॥ ब्राह्म
णाः वर्त्तंते॥ क्षत्रियाः संति॥ वैश्याः संति॥ शूद्राः संति॥ गुर्जराः वर्त्तंते॥ आंध्राः तिष्ठं
ति॥ कर्नाटकाः वर्त्तंते॥ द्रविडाः वर्त्तंते॥ महाराष्ट्राः तिष्ठंति॥ चित्रपावनाः संति॥ मा

ध्यंदिनाःसंति॥जैनाःसंति॥कान्यकुब्जाःसंति॥सारस्वताःसंति॥मथुरावर्त्तंते॥पा
श्चात्याःवर्त्तंते॥मरुजाःवर्त्तंते॥मागधीयाःसंति॥मैथिलाःसंति॥पार्वतीयाःसंति॥
त्रिहूतजाःसंति॥गौडानांदेशेण्व॥उत्कलाःवर्त्तंते॥कार्णीस्छाःवर्त्तंते॥गयापाल
काःसंति॥मयाठापालकाःतत्रगछंति॥वांगापुत्राःतत्रःआगछंति॥अन्येनीचजा
तीयातत्रवर्त्तंते॥नापिकाःसंति॥रजकाःसंति॥कुकुलावर्त्तंते॥शिल्पिनःसंति॥चि
त्रकारिणःस्तिष्ठंति॥जंतुपालाःवर्त्तंते॥स्वर्णशिल्पिनःअयःशिल्पिनःवर्त्तंते॥
वणिजस्तिष्ठंति॥पटुकाराःसंति॥मागधाःसंति॥अन्येपण्यजीवावहवस्तिष्ठंति॥ १८
यवनाःसंति॥चांडालाःवर्त्तंते॥वेणुफोटकाःवर्त्तंते॥धीवराःसंति॥वनेचराःसंति॥

व्याधाःसंति॥कुसुमोपजीविनःसंति॥जडिलाःवर्त्तंते॥तापसाःसंति॥वैरागिणःसं
ति॥भैरवोपासकाःसंति॥नगःसंति॥नर्त्तकाःसंति॥कुटलाःवर्त्तंते॥वेश्योपजीवनः
संति॥व्यवसायिनोबहवस्तिष्ठंति॥धनिकावहवोवर्त्तंते॥वैद्याःसंति॥ज्योतिर्विदः
संति॥मांत्रिकाःसंति॥एवंविधाःसर्वजातीयजनास्तत्रवसंतिस्वामिनः॥भूरिकिंव
क्तव्यंयद्यियांयेविशिष्टाःपदार्थावर्त्ततेतेसर्वेतत्रविद्यंते॥एवंचा॥तर्हि॥अतिस
मीचीनोदेशास्तिष्ठति॥तर्हिएकवारंमयागंतव्यंतत्रगंगासागरेस्नानंविधायअग्रे
पुरुषोत्तमस्यदर्शनंकृत्वागंतव्यं॥चातुर्मास्यंविधाय॥गामिष्यामितर्हि॥स्वामि
नःगंतव्यं॥स्वामिनासर्वंद्रष्टव्यं॥भवतु॥इतिउक्तेसतिभूयः॥यजमानउवाच॥

भा·सं· स्वामिनःभवतांपूर्वाश्रमेकोवाग्रामः॥अरेपूर्वाअस्माकंकर्नाटकदेशेबीजापूरग्रामः॥
एवतर्हि॥पूर्वाश्रमेश्रीमतांकावावृत्तिस्थिता॥भिक्षावृत्तिस्थितावव्यवसायवृ
१९ त्तिस्थिता॥अरेतत्किमपिमाएछस्व॥तत्किमपिवक्तुनोत्सहेह॥नहिस्वामिनः॥
ममश्रोतुंरुछावर्त्तते॥श्रव्यमेव॥अरेमयापूर्वाश्रमेव्यवसायास्थितं॥यदारूढ्म
स्छेश्वरस्य॥आमात्यः॥असत्वानृतितस्यपुत्रः॥जुलुफदारस्वानसयदादिग्वि
जयार्थंमागतःस्तदातस्यनिकटमेयाभूरिदिवसयर्यंतंव्यवसितं॥तदाअस्माकं
निकटेसहस्रद्वयंअश्ववाराःस्छिताः॥दशसहस्रपादचाराःस्छिताः॥चत्वा १९
रिंशद्दंतिनस्छिताः॥बहवोऽष्ट्राःस्छिताः॥बहवोरथास्छिताः॥तदामद्गृहेचत

स्रःपत्न्यंकास्छिताः॥कतिनोभारवाहवाःशकटाःस्छिताः॥पूर्वंअस्माकंगृहेषोड
शस्त्रियाः॥अतिसौंदर्यस्थिताः॥तासांलावण्यवर्णितुनशक्नुमः॥सकथंभूत॥
६ पद्मनेत्रंसंयस्याःवक्त्रंचंद्रोपमंशुभं॥स्मरयानोपमोकर्णोकपोलौचंद्रकोज्वलौ॥
नासिकातिलपुष्पाभाकामचापोपमौभ्रुवौ॥दशनाहीरकैस्तुल्याद्विद्रुमोपति
ताधरा॥मयूरस्यकपोलेनतुल्यकचनिबंधनं॥शंखेरवात्रयेणापिकंठदेशोवि
राजिते॥स्वल्पंकमध्यदेशंचमुष्टिग्राह्यंचकेवलं॥नाभिमंडलमध्यस्छलावण्यं
केनवर्ण्यते॥रंभोपमोरुजंघेभुजौकमलदंडकौ॥चरणंस्छलकमलाभं
मणिमंडितंनूपुरं॥इत्यादिममग्रहणीपिनासीत्॥ताःसर्वाःममसेवायांअति

तत्परास्थिताः॥तासूरेकाःअतिशोभनास्थिता॥तस्याःगुणतस्याःसौंदर्यंकिंवर्णयं॥केवलमपरादेवांगनेवस्थिता॥तस्याममरुचिरतीवस्थिता॥मांविनातस्यापिमनः कुत्रापिनागमत्॥अरेपूर्वंममनिकटेतिवारांगनास्थिताः॥ताःममवाहनांतिकेसंदेवासन्॥ताःस्वपिएकाअतीवलावण्यवतीस्थिता॥तस्याअतीवकोमल्यंस्थितं॥तस्याःकंठस्यमाधूर्यंगीतंनृत्यादिकं॥तथा॥आलाभिनयांश्चैववर्णितुंनैवशक्यते॥अधुनापियदातस्याःस्मरणंजायते तदा॥ममममनःकुत्रापिनलगति॥तत्किंकरणीयं॥यज्जातंतदृतं॥स्वप्नवत्तत्स्मरणीयं॥अरेपूर्वंममगृहेप्रत्यहंशतशाःब्राह्मणाःभोक्तारःस्थिताः॥तैः साकंमया मुहूर्तोभ्यंतरेमक्कोक्तव्यं॥तथैवबहवोअन्यार्थिनःतथैववस्त्रार्थिनः॥न

याकस्मिकायःयाचकाःअन्येपियेयेअर्थितःमांप्रतिआगताः॥तेषांसर्वेषांमनोवांछितंमयादत्तं॥ममप्रभुतायांसत्यंमत्सकाशात्कोपिनिराशतयानागमत्॥पूर्वंएतादृशीविभुतास्थिता॥अधुनाअनुभूतमपितत्सर्वंस्वप्नप्रायंभासते॥तस्यस्मरणेनमहतीपिव्यथाजायते॥तर्हिस्वामिनःपूर्वमेतादृशोवैभवस्थितः॥सहसातत्सर्वंकुत्रगतं॥तत्रकिंकारणंजातं॥अरेरेण॥ममाकस्मिकश्चिद्दिनेयोषिद्भिःसहरहसिसौधांतरेस्थितं॥तस्मिन्कालेममप्रभुणाअकारिप्तं॥द्विवारंदूतःप्रेषितः॥मयासौकर्यवशात्सरवोत्कर्षस्यकानगतांतराभूयोपिअनुचरःप्रेषितःतथापिमयानगतं॥अतिकारणात्सअतीवक्रुधः॥तेनअकस्मादेकावछेदेनसहस्रचतुष्टयाश्वचाराणांसेनाग्रेनी

BHAU DAJI

षितः॥तदाममानुयायिनःअसन्नक्षाःस्थिताः॥तदातेनघटिकाद्वयांतरंसर्वेलुटितं॥मया
पिगृहीत्वाचतुर्भुजंविधायनीतं॥तदाप्रभुणाअतीवनिर्भर्त्सितं॥मासचतुष्टयपर्यंतंत
स्यकारागृहेस्थितं॥पश्चाद्धूरवलामोचनंजातं॥तद्दिनारभ्यमममनसिअतीवअनु
तापोजातः॥तदासर्वेकुटुंबादिकंयत्कांकुरुक्षेत्रंगतः॥तत्रकियद्दिनपर्यंतंतपोनुष्ठि
तंतत्रैवसन्यासोगृहीतः॥पश्चादिहआगतं॥तर्हिस्वामिनःश्रीमतांतुर्याश्रमंगृहीत्वा
कतिवर्षाणिजातानि॥अरेममहादशचातुर्मास्यानिजातानि॥एतावद्दिनपर्यंतंमया
तीर्थाटनंकृतं॥सांप्रतंमासचतुष्टयंजातं॥इहआगत्य॥आधुनासर्वंत्यक्त्वामणिकर्णि २३
कांविश्वेश्वरंसेवयामि॥एवंतर्हिसम्यक्क्रियतेस्वामिनःविश्वेश्वरंसमंदेवंक्षेत्रंवा

राणसीसमं॥मनिकर्णिकमंतीर्थंनास्तिब्रह्मांडगोलके॥एवंउक्तंवर्त्ततेइतिकृत्वाभव
त्सदृशांएतादृशंक्षेत्रंविहायअन्यत्रवासोअनुचितः॥सत्यमुच्यते॥ममापिमनसिएवं
वर्त्तते॥असारेखलुसंसारेसारमेकंचतुष्टयं॥काश्यांवासःसतांसंगोगंगांभःशिवपूज
नं॥एतादृशंस्थलंविहाय॥अन्यत्रगतुंउचितंवा॥नहिस्वामिनःसत्यमुच्यते॥इतिउ
क्तेसतिस्वामिनःऊचुः अरेअतःपरंममगृहंप्रतिगम्यते॥ममाद्यभूरिकालसेपोजा
तःगीतःपाठोपिनकृतःसप्तशतीपाठोपिनकृतः॥विष्णुस्तवराजपाठोपिनकृतः॥विष्णु
सहस्रनामस्यपाठोपिनकृतः॥गजेंद्रमोक्षपाठोपिनकृतः॥भीष्मस्तवराजपाठोपिन
कृतः॥ममअनुष्ठानस्यसमयोजातः॥अतःपरंगंतव्यमेव॥इतिउक्त्वा॥स्वामिनःउ

स्थितः॥तदा यजमानेन स्वामिनां साष्टांगं प्रणामं विधाय॥यतिवर्यैः सह कतिचित्पदानि
गछंति॥ईषदुरं गत्वा स्वामिनं विज्ञापितवान्॥अद्य भूरिश्रमितं अतिकालोजातः क्षंतव्यं
स्वामिनः नारायणकिंदूदंउच्यते॥एतादृग्भक्तिरपिकस्यापिनस्यात्॥यादृग्भावनायबुध्यिर्भवति सादृग्॥स्वामिनः भवतां
प्रसादात्॥अतः परं ग्रामैः ग्रामैः गंतव्यं इतिउक्त्वा॥स्वामिनभिः अनुज्ञातः सन्पश्चान्नि
वृतः॥तदा स्वामिनः कमंडलुं कुत्रचिन्निक्षिप्य॥दंडयष्टिमवलंब्य ग्रामैः ग्रामैः अति
कष्टेनस्वमठंप्रतिगतः॥मठं गत्वाशिष्यंप्रत्यूचुः॥अरे मेषाश्रमस्त्वंशीघ्रमुत्तिष्ठतूर्णं २२
मास्तरंविधेहि॥अथतेनोच्यते॥स्वामिनः अनुष्ठानस्यसमयोजातः॥इदानींद्राक

थंविधीयते॥अरेत्वंतूष्णीं आस्तरंकुरुं॥एकंवस्त्रव्यजनेमार्द्रीकृत्यैमांवीजय॥शरीरेअतीवदाहोजायते॥तर्हिस्वामिनः अद्याकिंकिंभुक्तं॥अरेअधुनाकिमपिमाएछ पश्चाद्दृश्यामिअधुनावक्तुंनशक्यतेस्थातुमपिशक्यते॥एवमुक्तास्वामिषुशयितेषुसत्सुदृतः॥यजमानः किमाचरितवान्तदाह॥तदायजमानः पुनःस्त्रियमुवाच॥अयिश्रृणोषि॥अद्यत्वमपिश्रमितासिअहमपिश्रमितोस्मि॥इतिकृत्वाअदृलोपरितूर्णंशय्यांविरचय॥सर्वानर्मकान्अधस्तात्पत्वमपिशीघ्रमुपरिआगछ॥आदौसंध्यावंदनार्थमुदकंदेहिइतिउक्ते॥तयाएवमेवकृतं॥संध्यार्थमुदकंदत्तंतस्मिन्संध्यामनुष्ठितवति॥शीघ्रमुपरिगत्वापल्यंकोपरिआस्तरणमास्तृतं॥तदुपरि

मल्लिकाकुसुमानिकिंकीर्य॥तदुपरिअतिशुभ्रंचीनांकमास्तीर्य॥शिरोदेशेकंटुकद्वयं
संस्थाप्य॥पल्यंकअधोदेशेतांबूलसाधनादिकंसर्वंनिक्षिप्य॥स्वामिनमाख्यात्॥त
दासःसंध्यांविधायउपरिगतः॥उपरिछात्वापर्यंकोपरिउपविश्यस्त्रियमाकारित
वान्॥अयेत्वंशीघ्रमुपरिआगछ॥अधःकिंकरोषि॥इतिउक्तेसति॥साअपस्यादी
न्ययथास्थानंस्थापयित्वास्वयंउपरिआगता॥तदासःतांनिरीक्ष्यसविलासमुवाच॥
पानीयंपातुमिछामित्वत्तःकामललोचने॥यदिदास्यसिनेछामिनोदास्यसिपिबा
म्यहं॥अन्यत्रास्वछंसज्जानचित्तवल्लघुतरंदीनार्त्तिवछीतलंपुत्रालिंगनवत्तथै २३
वमधुरंबालस्यसंजव्यवत्॥एलोशीरलवंगचंदनलसत्कर्पूरकस्तूरिकाजातीचं

पकपाटलीसुरसितंपानीयमानीयतांइतिश्रुत्वातयाउदकंदत्तंतेनजलंपीत्वापु
नरुक्तवती॥पर्वाणिस्वर्णवर्णानिकर्णीतायतलोचने॥चूर्णमानीयतांतूर्णंपूर्णचं
द्रनिभानने॥तद्यथा॥तलाकारपयोधरेतनुभवत्तंत्राधिकारक्रियेनाभ्यन्मध्य
तलेतडित्समरुतेतत्रीसमालापिनी॥ताटंकानितताकृताक्षियुगलेतन्वंतिताम्रो
धरेतारानाथनिभाननेनतवकरात्तांबूलमानीयतां॥इतिउक्तेसति॥तयासोमक
ताःतांबूलविटिकादत्ता॥तदातेनरतस्याःपाणिंअवलंब्य॥तांक्रोडेउपवेशयन्॥
ततःतांदोर्भ्यांमुग्ध्य॥तस्याःवदनंचुचुंब॥ततःसाबुभोउत्तरक्रीडांचक्रांते॥ ॥
यःपूतनामारणलब्धवर्णःकाकोदरोयेनविनीतदर्पः॥यशोदयालंकृतमूर्त्तिरव्या

भा.सं. त्रनाथोरघूणामथवापदूनां॥ १ ॥ शके१७१८नळाह्वेपौषवद्य७गुरुवासरस्यइ
२८ दंपुस्तकंजोयि।कुतमानकामाषानधब्बाखासिगिपं॥जोगळेकरइत्युपनामप
रघुरामभट्टस्यभाष्यमंजरीइदंपुस्तकंसमाप्तीमगमत्॥ ॥शुभंभवतु॥ ॥
भग्नपृष्ठकटिग्रीवस्तब्धदृष्टिरधोमुखं॥कष्टेनलिखितंभाष्यंयत्नेनंप्रतिपालयेत्॥१॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात्॥मूर्खहस्तेनदातव्यमेवंवदतिपुस्तकं॥२॥
यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवामममदोषोनविद्यते॥३॥ २८

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिभाषामंजरीसमाप्तीम्॥